श्री आंजनेय स्तोत्रं

श्री आंजनेय स्तोत्रं

महेश्वर उवाच |
शृणु देवि प्रवक्ष्यामि स्तोत्रं सर्वभयापहं |
सर्वकामप्रदं नृणां हनूमत् स्तोत्रमुत्तमं || 1 ||

तप्तकांचनसंकाशं नानारत्नविभूषितं |
उद्यद्बालार्कवदनं त्रिनेत्रं कुंडलोज्ज्वलं || 2 ||

मौंजीकौपीनसंयुक्तं हेमयज्ञोपवीतिनं |
पिंगळाक्षं महाकायं टंकशैलेंद्रधारिणं || 3 ||

शिखानिक्षिप्तवालाग्रं मेरुशैलाग्रसंस्थितं |
मूर्तित्रयात्मकं पीनं महावीरं महाहनुं || 4 ||

हनुमंतं वायुपुत्रं नमामि ब्रह्मचारिणं |
त्रिमूर्त्यात्मकमात्मस्थं जपाकुसुमसन्निभं || 5 ||

नानाभूषणसंयुक्तं आंजनेयं नमाम्यहं |
पंचाक्षरस्थितं देवं नीलनीरदसन्निभं || 6 ||

पूजितं सर्वदेवैश्च राक्षसांतं नमाम्यहं |
अचलद्युतिसंकाशं सर्वालंकारभूषितं || 7 ||

षडक्षरस्थितं देवं नमामि कपिनायकं |
तप्तस्वर्णमयं देवं हरिद्राभं सुरार्चितं || 8 ||

सुंदरं साब्जनयनं त्रिनेत्रं तं नमाम्यहं |
अष्टाक्षराधिपं देवं हीरवर्णसमुज्ज्वलं || 9 ||

नमामि जनतावंद्यं लंकाप्रासादभंजनं |
अतसीपुष्पसंकाशं दशवर्णात्मकं विभुं || 10 ||

जटाधरं चतुर्बाहुं नमामि कपिनायकं |
द्वादशाक्षरमंत्रस्य नायकं कुंतधारिणं || 11 ||

अंकुशं च दधानं च कपिवीरं नमाम्यहं |
त्रयोदशाक्षरयुतं सीतादुःखनिवारिणं || 12 ||

पीतवर्णं लसत्कायं भजे सुग्रीवमंत्रिणं |
मालामंत्रात्मकं देवं चित्रवर्णं चतुर्भुजं || 13 ||

पाशांकुशाभयकरं धृतटंकं नमाम्यहं |
सुरासुरगणैः सर्वैः संस्तुतं प्रणमाम्यहं || 14 ||

एवं ध्यायेन्नरो नित्यं सर्वपापैः प्रमुच्यते |
प्राप्नोति चिंतितं कार्यं शीघ्रमेव न संशयः || 15 ||

इत्युमासंहितायां आंजनेय स्तोत्रं ||